# चतुर्दशः पाठः

## पञ्चमीविभक्तिप्रयोगः - (ପଞ୍ଚମୀ ବିଭକ୍ତି ବ୍ୟବହାର)

पश्यतु वदतु- ଦେଖ, କୁହ




वृक्षात् फलानि पतन्ति ।



बालः वाहनात् अवतरति ।



नलिकायाः जलं निपतति ।



महिला नद्याः जलम् आनयति ।

**उच्चैः पठतु** - ବଡ଼ପାଟିରେ ପଢ଼ ।

- अभिनेता विदेशात् आगच्छति ।
- वृष्टिः आकाशात् पतति ।
- वानरः वनात् आगच्छति ।
- जनकः नौकायाः अवतरति ।
- पुष्पं तरोः पतति ।

**ଶବ୍ଦାର୍ଥ** - ବାହନାତ୍ - ଗାଡ଼ିରୁ, ନୌକାୟାଃ - ନୌକାରୁ, ତରୋଃ - ଗଛରୁ ।

- तैलं कूप्याः स्रवति ।
- पर्वतेभ्यः नद्यः प्रवहन्ति ।
- नेत्राभ्याम् अश्रूणि पतन्ति ।
- सा हस्ताभ्यां कङ्कणानि निष्कासयति ।
- फलेभ्यः बीजानि प्राप्नुमः ।
- बालाः नदीभ्यः जलानि आनयन्ति ।
- पुत्राः जनकेभ्यः स्नेहं प्राप्नुवन्ति ।

## अवधेयम् (ମନେରଖ)

| प्रथमाविभक्तिः | पञ्चमीविभक्तिः | | |
|---|---|---|---|
| एकवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| घटः | घटात् | घटाभ्याम् | घटेभ्यः |
| हस्तः | हस्तात् | हस्ताभ्याम् | हस्तेभ्यः |
| पेटिका | पेटिकायाः | पेटिकाभ्याम् | पेटिकाभ्यः |
| लेखनी | लेखन्याः | लेखनीभ्याम् | लेखनीभ्यः |
| गुरुः | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| धेनुः | धेनोः / धेन्वाः | धेनुभ्याम् | धेनुभ्यः |
| वधूः | वध्वाः | वधूभ्याम् | वधूभ्यः |
| वनम् | वनात् | वनाभ्याम् | वनेभ्यः |

**ଶବ୍ଦାର୍ଥ :** କୂପ୍ୟାଃ - ବୋତଲରୁ, ନେତ୍ରାଭ୍ୟାମ୍ - ଆଖିରୁ, ଫଲେଭ୍ୟଃ - ଫଳରୁ, ଜନକେଭ୍ୟଃ - ବାପାଙ୍କଠାରୁ, ନିଷ୍କାସୟତି - ବାହାରକରୁଛି, ପ୍ରାପ୍ନୁମଃ - ଆମ୍ଭେମାନେ ପାଉଅଛୁ, ପ୍ରାପ୍ନୁବନ୍ତି - ପାଆନ୍ତି / ଲାଭକରନ୍ତି ।

# अभ्यासः (ଅଭ୍ୟାସ)



**१. शून्यस्थानानि पूरयतु (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)**

क) देशात्, देशाभ्याम् ________ ।

ख) ________ लताभ्याम्, लताभ्यः ।

ग) ________ वधूभ्याम्, वधूभ्यः ।

घ) गुरोः ________ गुरुभ्यः ।

ङ) नद्याः, नदीभ्याम् ________ ।

**२. मातृभाषया अर्थ लिखतु । (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)**

हस्ताभ्याम्, पर्वतेभ्यः, जनकात्, घटात्, धेनोः ।

**३. संस्कृतेन लिखतु । (ସଂସ୍କୃତରେ ଲେଖ)**

ନଦୀମାନଙ୍କରୁ, ଫଳରୁ, ଆଖିଦୁଇଟିରୁ, ଡଙ୍ଗାରୁ, ଆକାଶରୁ ।

**४. कोष्ठकस्थानां शब्दानां साहाय्येन वाक्यानि लिखतु ।**

| | | |
|---|---|---|
| अश्वः | वृक्षात् | पतति |
| नदी | आकाशात् | आगच्छति |
| फलम् | ग्रामात् | वहति |
| वृष्टिः | पर्वतात् | |

५. चित्रं पश्यतु, बालकः कस्मात् किं स्वीकरोति इति लिखतु ।

(ଚିତ୍ର ଦେଖି ପିଲାଟି କାହାଠାରୁ କ'ଣ ଗ୍ରହଣ କରୁଛି ଲେଖ ।)



यथा - बालकः मित्रात् वाहनं स्वीकरोति।

________________ ________________

________________ ________________

________________ ________________

________________ ________________

६. शून्यस्थाने उचितं पदं लिखतु - (ଶୂନ୍ୟସ୍ଥାନରେ ଶୁଦ୍ଧ ପଦ ଲେଖ)

क) ________ जनाः भारतम् आगच्छन्ति।

ख) पक्षिणः ________ सरोवरम् आगच्छन्ति।

ग) ________ पर्णानि पतन्ति।

घ) ________ प्रकाशः आगच्छति।

ङ) महान् वृक्षः ________ उद्भवति।

(बीजात्, लताभ्यः, सवितुः, विदेशात्, दूरात्)

**ତୁମପାଇଁ କାମ - ଏହି ପାଠରୁ ୧୦ଟି ସଂସ୍କୃତ ବାକ୍ୟ ସୁନ୍ଦର ଅକ୍ଷରରେ ଖାତାରେ ଲେଖି ଶିକ୍ଷକଙ୍କୁ ଦେଖାଅ।**

***